● **सप्तमः पाठः**

# कृष्णः गोपालनन्दनः

**(गोपालनन्दन कृष्ण)**

*इस पाठ में पुष्टि पुरुषोत्तम भगवान् कृष्ण के लिए अलौकिक लोकोपकारी 'बहुजन हिताय बहुजन सुखाय' कृत कार्यों का विशद् निरूपण किया गया है। यहाँ श्रीकृष्ण के गोपालनन्दक स्वरूप का उल्लेख आध्यात्मिक दृष्टि से समस्त इन्द्रियों के पुष्टिकारक और आनन्द प्रदायक रूप का निदर्शन है।*

सुविदितमेव श्रीकृष्णः लोकोत्तरो महापुरुषः आसीत्। अयं महापुरुषः सहस्रेभ्यः वर्षेभ्यः प्राक् उत्पन्नः अद्यापि जनानां हृदयेषु विराजमानः अस्ति।

श्रीकृष्णस्य मातुलः कंसः अत्याचारी शासकः आसीत्। स पूर्वं स्वभगिन्याः देवक्याः श्रीवसुदेवेन सह विवाहम् अकरोत्, पश्चाच्च आकाशवाण्या देवकीपुत्रेण स्वमृत्युसमाचारं विज्ञाय उभावपि कारागारे न्यक्षिपत्। तत्रैव कारागारे श्रीकृष्णः जातः।

श्रीकृष्णस्य जन्म भाद्रपदमासस्य कृष्णपक्षस्य अष्टम्यां तिथौ मथुरायाम् अभवत्। मध्यरात्रे यदायं उत्पन्नः जातः तदा आकाशे घटाटोपाः मेघाः मुसलधाराः वर्षाः अकुर्वन्। तदा रात्रिः अन्धकारपूर्णा आसीत्, परं वसुदेवः पुत्रस्य रक्षार्थं सद्योजातं तम् आदाय उत्तालतरङ्गां यमुनाम् उत्तीर्य गोकुले नन्दगृहं प्रापयत्। तत्र बाल्यादेव श्रीकृष्णः जनानां हृदयवल्लभः अभवत्।

बाल्यकाले अयं स्वसौन्दर्येण बाललीलया च सर्वेषां जनानां मनांसि अहरत्। कापि गोपिका तम् अङ्के निधाय स्वगृहं नयति, अपरा तं दुग्धं पाययति, अन्या च तस्मै नवनीतं ददाति। श्रीकृष्णः प्रेम्णा दत्तं दुग्धं पिबति, नवनीतं च खादति, अवसरं प्राप्य स स्वमित्रैः गोपैः सह कस्मिंश्चिद् गृहे प्रविश्य दधि खादति, मित्रेभ्यः ददाति, अवशिष्टं दधि भूमौ पातयति यदा कदा दधिभाण्डं च त्रोटयति। एतत् सर्वं कुर्वतोऽपि तस्य शीलेन सौन्दर्येण च प्रभावितः न कोऽपि तस्मै क्रुध्यति, परं सर्वे तस्मिन् स्निह्यन्ति।

अनन्तरं श्रीकृष्णः गोपालैः सह वनं गत्वा गाः चारयति, तत्र च वेणुं वादयति, अनेन सर्वाः गावः गोपालाश्च सर्वाणि कार्याणि विहाय तस्य वेणुवादनं शृण्वन्ति। महाकविः व्यासः संस्कृतभाषायां, भक्तकविः सूरदासः हिन्दी भाषायां तस्य बाललीलायाः अतिसुन्दरं वर्णनम् अकरोत्।

यदा अयं बालः एव आसीत् तदा कंसः तं हन्तुं क्रमशः बहून् राक्षसान् प्रेषयत, परं श्रीकृष्णः स्वकौशलेन शौर्येण च तान् सर्वान् अहन्। स न केवलं राक्षसेभ्यः अपितु अन्याभ्यः विपद्भ्यः गोकुलवासिनो जनान् अरक्षत्। एकदा वर्षाकाले गोकुले यमुनायाः जलं वेगेन अवर्धत्, तदा श्रीकृष्णः स्वप्राणान् अविगणय्य सर्वान् गोकुलनिवासिनः अरक्षत्। एवं निरन्तरं गोकुलवासिनां जनानां कष्टानि निवारयन् तेषां हृदये पदमधारयत्। अतः श्रीकृष्णः बाल्यकालादेव स्वोत्तमैः गुणैः परोपकारभावनया च लोकप्रियः अभवत्।

# अभ्यास प्रश्न

## ● लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए–**

१. श्रीकृष्ण: क: आसीत्?

२. कंस: क: आसीत्?

३. श्रीकृष्णस्य जन्म कुत्र अभवत्?

४. श्रीकृष्णस्य जन्म कदा अभवत्?

५. किं विज्ञाय कंस: देवकीवसुदेवौ कारागारे न्यक्षिपत्?

६. यदा श्रीकृष्ण: उत्पन्न: जात: तदा वातावरणं कीदृशम् आसीत्?

७. श्रीकृष्ण: कथं लोकप्रियो अभवत्?

८. वसुदेवेन सद्योजात: कृष्ण: कथं रक्षित:?

९. आकाशवाणीं श्रुत्वा कंस: किम् अकरोत्?

१०. श्रीकृष्ण: गोपै: सह कश्मिंश्चिद् गृहे प्रविश्य किं करोति?

११. क: कवि: संस्कृतभाषायां कृष्णबाललीलाया: वर्णनम् अकरोत्?

१२. क: कवि: हिन्दी भाषायां कृष्णबाललीलाया: वर्णनम् अकरोत्?

१३. श्रीकृष्ण: गोकुलवासिनां किं कल्याणं अकरोत्?

१४. कंस: राक्षसान् किमर्थम् प्रेषयत्?

## ● अनुवादात्मक प्रश्न

**(१) निम्नलिखित अनुच्छेदों का ससन्दर्भ हिन्दी में अनुवाद कीजिए–**

(अ) श्रीकृष्णस्य मातुल: ........................श्रीकृष्ण: जात:।

(ब) श्रीकृष्णस्य जन्म ................................. अभवत्।

(स) बाल्यकाले अयं .................................स्निह्यन्ति।

(द) अनन्तरं श्रीकृष्ण: ..................................अकरोत्।

(य) यदा अयं बाल: ......................................अभवत्।

**(२) निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(अ) श्रीकृष्ण लोकोत्तर महापुरुष थे।

(ब) श्रीकृष्ण का जन्म मथुरा में हुआ था।

(स) बचपन से ही लोग उनसे स्नेह करते थे।

(द) उन्होंने गोकुलवासियों का बड़ा कल्याण किया।

(य) श्रीकृष्ण बाँसुरी बजाते थे।

(र) सूरदास ने हिन्दी भाषा में बाललीला का बहुत सुन्दर वर्णन किया था।

(ल) वे अपने सौन्दर्य के लिए प्रसिद्ध थे।

## ● व्याकरणात्मक प्रश्न

**(१) निम्नलिखित पदों में समास-विग्रह कीजिए–**

नन्दगृहम्, लोकप्रियः, मृत्युसमाचारम्, दधिभाण्डम्, गोकुलवासिनः।

**(२) निम्नलिखित में सन्धि-विच्छेद कीजिए–**

अत्याचारी, परोपकारः, लोकोत्तरो, उभावपि, यदायं।

**(३) भूमि, जल तथा सूर्य के चार-चार पर्यायवाची शब्द लिखिए।**

**(४) श्रीकृष्ण पर पाँच वाक्य संस्कृत में लिखिए।**

## ● आन्तरिक मूल्यांकन

श्रीकृष्ण के जीवन की कथा अपने शब्दों में लिखिए।

## शब्दार्थ

**लोकोत्तरो** = अलौकिक। **मातुलः** = मामा। **प्राक्** = पहले। **उभावपि** = दोनों को। **न्यक्षिपत्** = डाल दिया। **मध्यरात्रे** = आधी रात में। **रक्षार्थं** = रक्षा के लिए। **सद्योजातं** = तुरन्त उत्पन्न। **आदाय** = लेकर के। **उत्तालतरंगां** = ऊँची-ऊँची तरंगों वाली। **उत्तीर्य** = पार करके। **प्रापयत्** = पहुँचा दिया। **हृदयवल्लभः** = हृदय को प्रिय। **अहरत्** = हर लिया। **निधाय** = लेकर। **पाययति** = पिलाती। **प्रेम्णा** = प्रेमपूर्वक। **चारयति** = चराते हैं। **वेणुं** = वंशी। **वादयति** = बजाते हैं। **विहाय** = त्यागकर। **शृण्वन्ति** = सुनते हैं। **हन्तुम्** = मारने के लिए। **प्रेषयत्** = भेजा। **शौर्येण** = वीरता से। **अहन्** = मारा। **अविगणय्य** = चिन्ता न करके। **निवारयन्** = निवारण करते हुए। **पदमधारयत्** = स्थान बना लिया। **सर्वोत्तमैः** = सबसे उत्तम। **अभवत्** = हो गये। **दधिभाण्डम्** = दही का बर्तन। **त्रोटयति** = तोड़ता है। **स्वोत्तमैः** = (स्व + उत्तमैः) अपने उत्तम। **लोकप्रियः** = प्रसिद्ध।

●